आयुर्नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनं
प्रत्यायान्ति गताः पुनर्न दिवसाः कालो जगद्भक्षकः ।
लक्ष्मीस्तोयतरङ्गभङ्गचपला विद्युच्चलं जीवितं
तस्मान्मां शरणागतं शरणद त्वं रक्ष रक्षाधुना ॥

(श्रीमच्छङ्कराचार्यविरचितं श्रीशिवापराधक्षमापनस्तोत्रम्, १३)

पदच्छेदः – आयुः नश्यति पश्यतां प्रतिदिनं याति क्षयं यौवनम् प्रत्यायान्ति गताः पुनः न दिवसाः कालः जगत् भक्षकः । लक्ष्मीः तोयतरङ्गभङ्गचपला विद्युत् चलं जीवितम् तस्मात् मां शरणागतं शरणद त्वं रक्ष रक्ष अधुना ।

अन्वयः – पश्यतां, प्रतिदिनम् आयुः नश्यति, यौवनं क्षयं याति, गताः दिवसाः पुनः न प्रत्यायान्ति, कालः जगद्भक्षकः । लक्ष्मीः तोय-तरङ्ग-भङ्ग-चपला, विद्युत् चलं जीवितम् । तस्मात् हे शरणद ! त्वं मां शरणागतम् अधुना रक्ष रक्ष ॥

व्याख्या – पश्यतां नाम विलोक्यताम् । अर्थात् पश्यतु । विलोकयतु । प्रतिदिनम् आयुः नश्यति । अर्थात् दिने दिने अनुदिनं वा आयुः जीवनस्य कालः समयः अवधिः वा नश्यति क्षयं याति क्षयं गच्छति । अस्माकं जीवनकालः दिने दिने ह्रासः भवति । क्षीणः भवति न्यूनः भवति । यौवनं क्षयं याति । अर्थात् यूनः भावः युवाकालः तरुणस्य वयः युवावयः क्षयं गच्छति । ह्रासः भवति । अल्पः भवति । अर्थात् यौवनकालः अपगच्छति वार्धक्यावस्था आगच्छति । गताः दिवसाः पुनः न प्रत्यायान्ति । अर्थात् ये दिवसाः गताः, यानि दिनानि गतानि, अतीतानि, तानि दिनानि पुनः न प्रत्यायान्ति, न प्रत्यागच्छन्ति न पुनर् आगच्छन्ति । कालः जगद्भक्षकः । कालः नाम समयः जगद्-भक्षकः जगतः भक्षकः । समयः मृत्युरूपेण अथवा मृत्युः कालरूपेण वा जगत् भक्षयति । ग्रसति वा खादति वा । लक्ष्मीः नाम धनं तोयः नाम जलं वारि वा तस्य तरङ्गः नाम लहरी । भङ्ग नाम भग्नशीलः । चपला नाम चलस्वभावा, चञ्चलस्वभावा नाम अस्थिरा । अर्थात् धनं जलस्य भग्नशीलः तरङ्ग इव चपलं चञ्चलस्वभावं भवति अस्थिरं भवति । विद्युत् चलं जीवितम् अर्थात् जीवितं नाम जीवनं विद्युत् इव तडित् इव चलं भवति चञ्चलं भवति अस्थिरं भवति । तस्मात् । अतः । हे शरणद ! हे शरणदानक्षम प्रभो ! हे रक्षणशील ईश्वर ! हे शरणदानशील ईश्वर ! हे त्राणकर्तः परमेश्वर ! अधुना इदानीं सम्प्रति साम्प्रतं एतस्मिन् क्षणे वा तव शरणे रक्षणे आगतं मां मादृशं दीनं जनं मादृशम् असहायं जनं त्वं शरणदानशीलः परमेश्वरः रक्ष रक्ष त्रायस्व त्रायस्व अर्थात् सर्वथा सर्वस्मिन् काले मम रक्षणं कुरु । इति अर्थः ॥
सुभाषितमिदं शार्दूलविक्रीडितं नाम छन्दसा विरचितमस्ति ।एतस्य छन्दसः लक्षणं पूर्वस्मिन् सुभाषिते द्रष्टव्यम् ॥